योगवासिष्ठः/प्रकरणम् ६ (निर्वाणप्रकरणस्य उत्तरार्धम्)/सर्गः १३५

पञ्चत्रिंशदधिकशततमः सर्गः १३५

श्रीवसिष्ठ उवाच ।

मत्तेन भूतवृन्देन किंचिच्छेषीकृते शवे ।

इदमूचुः पुनर्दिक्षु गिरौ देवाः सवासवाः ।। १

विद्याधरामरविहारविमानभूमा-

वप्यास्तृतान्यशिशिरीकरणाय भूतैः ।

मेदोमयानि पवनप्रसृतामलाभ्र-

खण्डाञ्चिताम्बरसमान्युरुजालकानि ।। २

द्वीपेषु सप्तस्वपि पश्य मेदो-

जलानि भूतैः प्रविसारितानि ।

भुक्तं च मांसं रुधिरं च पीतं

किंचिद्गता संप्रति दृश्यतां भूः ।। ३

मेदःपटैरावलिताखिलाङ्गी

कष्टं स्थिता संप्रति मोदना भूः ।

मेदोमयैः शारदमेघजालैः

सकम्बलानीव वनानि भान्ति ।। ४

पञ्चैतानि तदस्थीनि संपन्नानि महाद्रयः ।

हिमाद्रिशिखराणीव स्थितान्यावार्य दिक्तटम् ।। ५

श्रीवसिष्ठ उवाच ।

देवेषु कथयत्स्वेवं कृत्वेमां मेदिनीं धराम् ।

मेदोजालैः स भूतौघो मत्तो व्योम्नि ननर्त ह ।। ६

नृत्यत्सु भूतवृन्देषु शिष्टं रक्तं सुरैर्भुवः ।

एकप्रवाहेणैकस्मिन्निक्षिप्तं मकरालये ।। ७

सुरार्णवं तमेवैनं संकल्पं विदधुः सुराः ।

ततःप्रभृति सोऽद्यापि संपन्नो मदिरार्णवः ।। ८

भूतानि नृत्तमाकाशे तानि कृत्वा पिबन्ति ताम् ।

मदिरां पुनराकाशे नृत्यन्त्यानन्दमन्दिरे ।। ९

पिबन्त्यद्यापि तानीव मदिरां मदिरार्णवात् ।

खे नृत्यन्ति च भूतानि सह योगेश्वरीगणैः ।। १०

तेषां तान्यथ भूतानां मेदोजालानि भूतले ।

विस्तृतान्यवशुष्काणि स्थितातो मेदिनी मही ।। ११

इति क्रमाच्छान्तिमुपागते शवे

पुनः प्रवृत्ते दिनयामिनीक्रमे ।

प्रजाः ससर्जाथ नवाः प्रजापतिः

पुनः स सर्गोऽभवदत्र पूर्ववत् ।। १२

इत्यार्षे श्रीवासि० वाल्मीकीये दे० मो० निर्वा० उ० अ० विप० शवो० शवोपशमो नाम पञ्चत्रिंशदधिकशततमः सर्गः ।। १३५।।